सैव पामा। स्फोटैर्महद्भिः। स्फिचौ प्रोथौ॥६॥ दद्रूमाह।
"सकण्डूरागपिड़कं दद्रूमण्डलमुद्गतम्"॥
दद्रूमण्डलं मण्डलरूपेणोत्पद्यते। उद्गतमुच्छूनम्॥७॥ विस्फोटमाह। "स्फोटाः श्यावारुणा भासा विस्फोटाः स्युस्तनुत्वचः॥८॥ किटिभमाह। "श्यावं किणखरस्पर्शं परुषं किटिभं स्मृतम्"। किणखरस्पर्शं किणः शुष्कव्रणस्थानं तद्वत् कर्कशस्पर्शम्॥ परुषं रूक्षम्॥९॥ अलसकमाह।
"कण्डूमद्भिः सरागैश्च गण्डैरलसकश्चितम्"।
गण्डैर्महापिड़काभिः। चितं विचेष्टितम्॥१०॥
शतारुषमाह।
"रक्तं श्यावं सदाहार्त्तिं शतारुः स्याद्बहुव्रणम्"॥११॥ अथ सप्तधातुगतानां कुष्ठानां लक्षणमाह। तत्र रसगतस्य लक्षणमाह।
"त्वक्स्थे वैवर्ण्यमङ्गेषु कुष्ठे रौक्ष्यञ्च जायते।
त्वक्स्वापो रोमहर्षश्च स्वेदस्यातिप्रवर्त्तनम्"॥
त्वक्शब्देनात्र रस उच्यते। धातुप्रस्तावात् त्वक्स्थाच्च। त्वक्स्वापः स्पर्शाज्ञत्वम्। त्वक्स्वाप इत्यादिकं केचिदत्र रक्तगतस्य लिङ्गं मन्यन्ते॥१॥
रुधिरगतमाह।
"कण्डूर्व्विपूयकश्चैव कुष्ठे शोणितसम्भवे"॥
विपूयः विशेषेण पूयः॥२॥ मांसगतमाह।
"बाहुल्यं रक्तशोषश्च कार्कश्यं पिड़कोद्गमः।
तोदः स्फोटाः स्थिरत्वञ्च कुष्ठे मांससमाश्रिते"॥
बाहुल्यं कुष्ठस्य पुष्टिः। पिड़कोद्गमः क्षुद्रपिड़कोद्गमः। स्फोटाः बृहत्पिड़काः। स्थिरत्वं अंशचारित्वम्॥३॥ मेदोगतमाह।
"कौण्यं गतिक्षयोऽङ्गानां सम्भेदः क्षतसर्पणम्।
मेदःस्थानगते लिङ्गं प्रागुक्तानि तथैव च"॥
कौण्यं हस्तभङ्गः। अङ्गानां सम्भेदः अङ्गभङ्गः। क्षतसर्पणं क्षतप्रसरणम्। प्रागुक्तानि रक्तमांसगतलिङ्गानि॥४॥ अस्थिमज्जगतमाह।
"नासाभङ्गोऽक्षिरागश्च क्षतेषु कृमिसम्भवः।
स्वरोपघातः पिड़का भवेत् कुष्ठेऽस्थिमज्जगे"॥५॥६॥
शुक्रगतमाह।
"दम्पत्योः कुष्ठबाहुल्याद्दुष्टशोणितशुक्रयोः।
यदपत्यं तयोर्ज्जातं ज्ञेयं तदपि कुष्ठितम्"॥
दम्पत्योः स्त्रीपुरुषयोर्दुष्टशोणितशुक्रयोर्यदपत्यं तयोर्ज्जातमिति॥ ७॥ *॥ ननु शुद्धशोणितशुक्रयोरेव दम्पत्योर्गर्भसम्भवाद्दुष्टशोणितशुक्रयोः कथमपत्योत्पत्तिः। यत आह सुश्रुतः।
"आमाग्निमिथुनसंयोगे शुद्धशोणितशुक्रजः।
गर्भः सञ्जायते नार्य्याः स जातो बाल उच्यते"॥
इति। अन्यच्च। वातादिदुष्टरेतसः प्रजोत्पादने न समर्थाः। इति। उच्यते। गर्भोऽत्र शुद्धो बोद्धव्यः। अशुद्धस्तु गर्भो दुष्टशोणितशुक्रयोरपि भवति पङ्गुजन्मान्धबधिरादीनां सम्भवात्। शोणितमत्रार्त्तवम्। कुष्ठितं कुष्ठं संजातमस्येति तारकादित्वादितच्। शुक्रार्त्तवगतं कुष्ठमपत्येन लभ्यते इति तात्पर्य्यम्॥ *॥ कुष्ठेष्वेवं वातादि दोषचिह्नमाह।

"खरं श्यावारुणं रूक्षं वातकुष्ठं सवेदनम्।
पित्तात् प्रकुपितं दाहरागस्रावान्वितं मतम्॥
कफात् क्लेदि घनं स्निग्धं सकण्डू शैत्यगौरवम्।
द्विलिङ्गं द्वन्द्वजं कुष्ठं त्रिलिङ्गं सान्निपातिकम्"॥
खरं कर्कशम्। श्यावारुणं श्यावं चारुणञ्च। प्रकुपितं क्लेदपूतिबहुलम्। क्लेदि आर्द्रतायुक्तम्। घनं पुष्टम्॥ *॥ साध्यत्वादिकमाह।
"साध्यं त्वग्रक्तमांसस्थं वातश्लेष्माधिकञ्च यत्।
मेदोगं द्वन्द्वजं याप्यं वर्ज्यं मज्जास्थिसंश्रितम्॥
कृमितृड्दाहमन्दाग्निसंयुक्तं यत्त्रिदोषजम्"।
वातश्लेष्माधिकञ्च यत् एतेन सिध्मैककुष्ठगजचर्म्मविपादिकाकिटिभालसकानि साध्यानि। मज्जप्रत्यासत्त्या शुक्रगतमप्यसाध्यम्। कृमितृड्दाहादिभिर्युतं त्रिदोषजं वर्ज्यमित्यन्वयः॥ *॥ अरिष्टमाह।
"प्रभिन्नं प्रस्रुताङ्गञ्च रक्तनेत्रं हतस्वरम्।
पञ्चकर्म्मगुणातीतं कुष्ठं हन्तीह कुष्ठिनम्"॥
प्रभिन्नं विदीर्णम्। हतस्वरं घर्घरस्वरम्। पञ्चकर्म्मगुणातीतं असंजातावमनादिपञ्चकर्म्मगुणम्॥ अथ त्वग्दृष्टिसाम्यात् कुष्ठभेदत्वाच्चात्रैव श्वित्रमाह।
"कुष्ठैकसम्भवं श्वित्रं किलासञ्चारुणं भवेत्।
निर्द्दिष्टमपरिस्रावि त्रिधातूद्भवसंश्रयम्"॥
कुष्ठैकसम्भवं कुष्ठेन सह एकस्तुल्यः सम्भवो निदानं यस्य तत्॥*॥ श्वित्रस्य भेदानाह। किलासञ्चारुणं भवेत्। श्वित्रमेव रक्तमांसाश्रयात् किलासमरुणञ्च भवेदित्यर्थः॥ *॥ ननु कुष्ठस्य श्वित्रस्य च को भेद इत्यत आह। निर्द्दिष्टमपरिस्राबीति। श्वित्रमपरिस्रावि भवति कुष्ठन्तु स्रावि अथ च त्रिधातूद्भवसंश्रयमिति त्रयो धातवो वातपित्तकफास्तेभ्यः पृथग्भूतेभ्य उद्भवो यस्य तत्। अथ च त्रयो धातवो रक्तमांसमेदांसि संश्रयोऽधिष्ठानं यस्य तत्। कुष्ठं सान्निपातिकं सर्व्वधातुगतञ्च भवतीति भेदः॥ *॥
दोषभेदेन लक्षणभेदानाह।
"वाताद्रूक्षारुणं पित्तात्ताम्रं कमलपत्रवत्।
सदाहं रोमविध्वंसि कफाच्छ्वेतं घनं गुरु॥
सकण्डूकं क्रमाद्रक्तं मांसमेदःसु चादिशेत्।
वर्णैनैवेदृगुभयं कुष्ठं तच्चोत्तरोत्तरम्"॥
अरुणमीषल्लोहितम्। कमलपत्रवदित्यनेन मध्ये श्वेतमन्ते लोहितं बोधयति। घनं पुष्टम्। क्रमाद्रक्तं मांसमेदःसु चादिशेत्। तथा च चरकः।
"अरुणं रक्तगे वाते ताम्रं पित्ते यत्नं गते।
श्वेतं श्लेष्मणि मेदःस्थे श्वित्रं कुष्ठं परं परम्"॥
उभयं द्विविधमपि श्वित्रं वर्णैन ईदृगेव अरुणं ताम्रं श्वेतञ्च। दोषभेदात् द्विविधं दोषजं व्रणजञ्च। तथा च भोजः॥ "श्वित्रन्तु द्विविधं विद्याद्दोषजं व्रणजं तथा"। इति॥ *॥
श्वित्रं साध्यमसाध्यञ्चाह।
"अशुक्लरोमाबहुलमसंसृष्टमथो नवम्।
अनग्निदग्धजं साध्यं श्वित्रं वर्ज्यमतोऽन्यथा"॥
असंसृष्टं तनु। अन्यच्च।
"गुह्यपाणितलौष्ठेषु जातमप्यचिरन्तनम्।
वर्ज्जनीयं विशेषेण किलासं सिद्धिमिच्छता"॥

गुह्यं मेहनं भगञ्च। तलमत्र पादतलम्। सुश्रुतेनात्र जातमिति सामान्यतो निर्द्दिष्टत्वात्। अचिरन्तनं नवमपि॥ *॥ कुष्ठस्य संसर्गजत्वे प्रसङ्गेनान्यानपि संसर्गजान् रोगानाह।
"प्रसङ्गात् गात्रसंस्पर्शात् निश्वासात् सहभोजनात्।
एकशय्यासनाच्चापि वस्त्रमाल्यानुलेपनात्॥
कुष्ठं ज्वरश्च शोषश्च नेत्राभिष्यन्द एव च।
औपसर्गिकरोगाश्च संक्रामन्ति नरान्नरम्"॥
प्रसङ्गात् प्रकर्षेण सङ्गः प्रसङ्गो मैथुनं तस्मात्। गात्रसंस्पर्शात् तर्हि मैथुनादिति विशेषार्थम्। वस्त्रमाल्यानुलेपनात् एकस्मादेव। शोषो यक्ष्मा। औपसर्गिकरोगाः शीतलादयः॥ *॥ सकुष्ठस्य मृतस्य पुनर्जातस्यापि कुष्ठं भवतीत्याह।
"म्रियते यदि कुष्ठेन पुनर्जातस्य तद्भवेत्।
नातो निन्द्यतरो रोगो यथा कुष्ठं प्रकीर्त्तितम्"॥
एतावता कुष्ठिनां कुष्ठं सर्व्वथा प्रतिकरणीयं न तदुपेक्षणीयम्॥
अथ कुष्ठस्य चिकित्सा।
"वातोत्तरेषु सर्पिर्व्वमनं श्लेष्मोत्तरेषु कुष्ठेषु।
पित्तोत्तरेषु मोक्षो रक्तस्य विरेचनञ्चेष्टम्"॥
"पथ्याकरञ्जसिद्धार्थनिशावल्गुजसैन्धवैः।
विड़ङ्गसहितैः पिष्टैर्लेपो मूत्रेण कुष्ठनुत्"॥
अवल्गुजः वकुचीति लोके। पथ्यादिर्लेपः॥ *॥
"सोमराजीभवं चूर्णं धृष्टवेगसमन्वितम्।
उद्वर्त्तनमिदं हन्ति कुष्ठे रागकृतास्पदम्"॥
सोमराजी वकुचीति लोके। सोमराज्युद्वर्त्तनम्॥
"रसायनं प्रवक्ष्यामि ब्रह्मणा यदुदाहृतम्।
मार्कण्डेयप्रभृतिभिर्यत् प्रयुक्तं महर्षिभिः॥*॥
पुष्पकाले तु पुष्पाणि फलकाले फलानि च।
संहृत्य पिचुमर्द्दस्य त्वङ्मूलानि दलानि च॥
द्विरंशानि समाहृत्य भागिकानि प्रकल्पयेत्।
त्रिफला त्र्यूषणं ब्राह्मी श्वदंष्ट्रारुष्कराग्नयः॥
विड़ङ्गसारवाराहीलोहचूर्णामृताः समाः।
निशाद्वयावल्गुजकव्याधिघाताः सशर्कराः॥
कुष्ठमिन्द्रयवाः पाठा चूर्णमेषान्तु संहतम्।
खदिरासननिम्बानां घनक्वाथेन भावयेत्॥
सप्तधा पञ्चनिम्बन्तु मार्कवस्य रसेन च।
स्निग्धः शुद्धतनुर्धीमान् योजयेत्तच्छुभे दिने॥
मधुना तिक्तहविषा खदिरासनवारिणा।
लेह्यमुष्णाम्भसा वापि कोलवृद्ध्या पलं भवेत्॥
जीर्णे तस्मिन् समश्नीयात् स्निग्धं लघुहितञ्च यत्॥
विचर्च्चिकोदुम्बरपुण्डरीक-
कपालदद्रूकिटिभालसादि।
शतारुविस्फोटविसर्पमालाः
कफप्रकोपं त्रिविधं किलासम्॥
भगन्दरश्लीपदवातरक्त-
जड़ान्ध्यनाड़ीव्रणशीर्षरोगान्।
सर्व्वान् प्रमेहान् प्रदरांश्च सर्व्वान्
दंष्ट्राविषं मूलविषं निहन्ति॥
स्थूलोदरः सिंहकृशोदरः स्यात्
सुश्लिष्टसन्धिर्मधुनोपयोगात्।
सदोषरोगादपि ये दग्धान्ति